
REET 2025
LEVEL-1&2
वंदन बैच
संस्कृत
भाषा शिक्षण विधियाँ
Part -2
LIVE
17-02-2025 03:00 PM

REET 2025 L - 1 & 2 संस्कृत वंदन बैच

"संस्कृत भाषा-शिक्षण-विधयः" (भाषा प्रथम व भाषा द्वितीय दोनों के लिए)

संस्कृत शिक्षा प्राचीनकालात् प्रचलति। अतः प्राचीनकालात् वर्तमानकाले संस्कृतशिक्षणस्य अतीव महत्वं वर्तते। संस्कृत शिक्षणं केन-केन विधिना प्राचीनकाले प्रदीयते स्म? आधुनिक काले शिक्षणमिदं कथं प्रचलति ? कथं प्रचाल्येत, एतेषां प्रश्नानां समाधानाय संस्कृत शिक्षणस्य विधयः त्रिषु भागेषु विभक्तुं शक्यते-

1. प्राचीन विधिः
2. नवीन विधिः
3. नवीनतम विधिः
4. प्राचीन विधिः

**नवीनविधिः** लॉर्डमैकालेमहोदयस्य शिक्षणपद्धत्याः परं संस्कृतशिक्षणस्य कृते अद्यावधि प्रयुज्यमानाः विधयः अर्वाचीनविधयः (नवीनविधिः) कथ्यन्ते। ते विधयः निम्नलिखिताः सन्ति-

- **पाठ्यपुस्तकविधिः** भारते पाठ्यपुस्तक विधेः समर्थकाः डॉ. वेस्टमहोदयाः आसन् । तेषां मतानुसारं शिक्षणम् ईदृशं स्यात् यत् छात्रः यस्याम् अवस्थायाम् अपि विद्यालयं परित्यजेत् तेन अधीतस्य प्रयोजनं लब्धुं शक्यते। अस्मिन् विधौ कक्षास्तरानुगुणं वर्गीकरणं क्रियते। वर्गीकरणम् इदं वातावरणे आधारितं भवति । पाठ्यपुस्तकेषु वर्णमालायाः आरभ्य पदानि, वाक्यानि, अनुच्छेदाश्च भवन्ति । आदर्शवाचनम्, अनुवाचनं, पाठप्रवर्धनम् अङ्गीकृत्य मौनपाठनं कार्यते।

## गुणाः

- छात्राणां शब्दकोशस्य वृद्धिकरणे सहायको भवति।
- सस्वरवाचनेन छात्रेभ्यः शुद्धोच्चारणभ्यासस्य अवसरः दीयते।
- अवकाशसमये छात्रः पाठान् स्वयमध्येतुं प्रभवति।
- संस्कृतसाहित्यं प्रति अनुरागः प्रादुर्भवति।
- अस्मिन् विधौ शिक्षणसूत्राणाम् अनुसरणं पूर्णरूपेण क्रियते अतः विधिरयं मनोवैज्ञानिकः अस्ति।

## दोष:

- अस्मिन् विधौ छात्राणां ध्यानं केवलं पाठ्यपुस्तक-पर्यन्तमेव सीमितं भवति । ते संस्कृतसाहित्यस्य व्यापकज्ञानाय प्रेरिताः न भवन्ति ।
- छात्राणां शिक्षकाणाञ्च समीक्षात्मकशक्तिः शनैः शनैः लुप्ता भवति। तेषु रटनस्य प्रवृत्ति आयाति ।
- व्याकरणस्य क्रमबद्ध ज्ञानस्य अभावो भवति।

**प्रत्यक्षविधिः** विधिरयं सुगमपद्धति, निर्बाधविधिः, मातृविधिश्च इति नाम्नाऽपि ज्ञायते। सर्वप्रथम आङ्गलभाषाबोधनाय अस्य प्रयोगो दृश्यते। प्रत्यक्षविधेः तात्पर्यम् अस्ति यत् या भाषा अध्यापनीया, सा स्वमाध्यमेनैव बोधनीया।

- अस्मिन् विधौ ध्येयाः बिन्दवः
- मौखिक कार्यस्य प्रधानता स्यात् ।
- कामपि भाषां बोधयितुं मातृभाषायाः प्रयोगः न करणीयः।
- पदपदार्थयोः मिथः साक्षात् सम्बन्धं संस्थाप्य पाठयेत्।

संस्कृतशिक्षणे अस्य विधेः प्रयोगः सर्वप्रथमं प्रो. वी.पी. बोकील-महोदयेन अल्फिन्स्टोननाम्निविद्यालये, मुम्बईनगरेकृतः।

इत्यस्मिन् पुस्तके प्रो. बोकीलमहाभागेन प्रत्यक्षविधेः उपयोगितायाः वर्णनं सम्यग्रूपेण प्रतिपादितम् ।

**गुणाः**

- अयं विधिः भाषाशिक्षणसिद्धान्तानुकूलोऽस्ति ।
- छात्रशिक्षकयोः मध्ये सम्भाषणं प्रचलति अतः ते सक्रियाः भवन्ति।
- श्रवणे-पठने-लेखने-भाषणे च पर्याप्त अवसरः उपलभ्यते ।
- अयं विधिः संस्कृतशिक्षायाः स्तरोन्नयनाय सहायकः भवति।
- छात्रेषु संस्कृतमाध्यमेन स्वतन्त्ररूपेण स्वविचारान् प्रकटयितुं क्षमतायाः विकासः भवति।

## दोष:

- प्राथमिकस्तरे एष अनुपयुक्तो भवति ।
- अनेन विधिना संस्कृतशिक्षणस्य गतिः मन्दा भवति ।
- प्रतिभाशालिनः छात्रः उपकृता भवन्ति न तु सामन्याः मन्दाश्च।
- भाषणकौशलस्य प्राधानान्यात् अन्यभाषाकौशलानाम् उपेक्षा भवति।
- विश्लेषणात्मक विधिः संस्कृतशिक्षणे अयं विधिः विशेषतः व्याकरण कथापाठयोः कृते उपयोगी अस्ति। अयं विधिः 'पूर्णात् अंशं प्रति' इति सूत्रम् अनुसृत्य कार्यं करोति । पूर्वं तु पाठस्य सम्पूर्णम् अशं शिक्षकः बोधयति, ततः परं एकैकम् अंशं गृहीत्वा तस्य विश्लेषणं करोति। यथा - विभिन्नानां पदानां विच्छेदं, समासविग्रहं तदनन्तरं संश्रूषणस्य प्रक्रियाम् अनुसरति ।

## गुणाः

- छात्राः पठनाय प्रेरिताः भवन्ति ।
- शिक्षणसूत्राणाम् अनुकरणेन अयं विधिः मनेवैज्ञानिकः अस्ति ।
- शिक्षणं रुचिकरं, सरलं, सुग्राह्यञ्च भवति ।
- क्लिष्ट पदानाम्, अंशानां, विषयाञ्च स्पष्टीकरणे सहायकः भवति।

## दोषः

- विधिरयम् उच्चस्तराय उपयोगी नास्ति।
- सर्वासां विधानां शिक्षणम् अनेन विधिना न भवितुं शक्यते।

- **व्याख्याविधि:** अयं विधिः प्राचीनकालेऽपि व्यवहारे आसीत् इदानीम् अपि प्रयोगः क्रियते। क्लिष्ट पदानां, नूतनविचाराणां, भावनाम् अभिव्यक्तिः अर्थस्पष्टीकरणाय विधिरयम्, उपयोगी अस्ति।

**व्याकरणविधि-** व्याकरणं भाषाया: आत्मा अस्ति। वेदाङ्गेषु व्याकरणं प्रधानं विद्यते-

प्रधानं च षट्स्वंगेषु व्याकरणम्।' व्याकरणं वेदपुरुषस्य मुखम् अस्ति। येन प्रकारेण शरीरे मुखस्य स्थानं प्रधानं भवति। अनेन व्याकरणस्य महत्त्वं स्पष्टं भवति।

- **हरबार्टीपञ्चपदी (हरबर्टीयपञ्चपदी)-** सुप्रसिद्धशिक्षाशास्त्रि मनोवैज्ञानिक हरबार्टमहोदयस्य सिद्धान्तानाम् आधारेण तेषां शिष्यैः अयं शास्त्रीयाशिक्षणविधिः प्रस्तुतः। अस्मिन् विधौ पञ्चसोपनानि भवन्ति। तेषां संक्षिप्त परिचय: अत्र प्रस्तूयते
- **प्रस्तावना (उन्मुखीकरणम्)-** इयं छात्राणां पूर्वज्ञानेन सम्बद्धा भवति। पूर्वार्जितज्ञानस्य आधारेण कतिपयप्रश्नाः चित्र मानचित्र श्लोक-कथादीन् प्रस्तुत्य पृच्छयन्ते। प्राप्तोत्तराणाम् आधारेण पठनाय छात्राः मानसिकरूपेण सज्जीक्रियन्ते।

- विषयोपस्थापनम् (प्रदर्शनम्) अनेन सोपानेन सह नवीन-पाठस्य शिक्षणं प्रारभ्यते। प्रत्येकं विधायाः कृते विषयोपस्थापन शैली भिन्ना-भिन्ना भवति यथा- गद्यपाठे आदर्शवाचनम्, अनुवाचनम्, अशुद्धिसंशोधनम्, काठिन्यनिवारणम्, इत्यादयः समागच्छन्ति।

- **तुलना (अमूर्तीकरणम्) - छात्रैः** येषु येषु स्थलेषु काठिन्यम् अनुभूयन्ते तासां निवारणाय समभावानां विषयभावानाम् उदाहरणैः दृश्यश्रव्योपकरणैः, सारकथनेन च प्रयोगः क्रियते।
- **सामान्यीकरणम्-** सोपानेऽस्मिन् छात्राः पाठस्य निष्कर्षं प्रति गच्छन्ति, यथा- व्याकरणपाठे उदाहरणेभ्यः नियमान् प्रति गद्यपाठे पाठस्य मुख्यसारं प्रति। नियमानी सिद्धान्तानां, स्रोतः साधनानाञ्च सामान्यीकरणं क्रियते ।
- प्रयोग पाठस्य अध्ययनात्परं नवार्जितज्ञानस्य प्रयोगाय शिक्षणस्य सफलतायाः परीक्षणाय शिक्षकः अभ्यासकार्यं कारयति। विद्यार्थिनां याः शङ्काः सन्ति ताः अपकरोति । तेभ्यः किञ्चित् मौखिकं लेखनकार्यं वा ददाति ।

**गुणाः**

- अयं विधिः मनोवैज्ञानिकसिद्धान्तेष्वाधारितोऽस्ति ।
- अनेन छात्राणां ज्ञानं स्थायी भवति।
- शिक्षणं शिक्षण-सिद्धान्तानां सूत्राणाञ्च अनुकरणं करोति ।
- शिक्षणस्य बोधगम्यतायै बलं दीयते।
- छात्राः निरन्तरं परीक्षिताः भवेयुः ।

**दोषः**

* सर्वेषां विषयाणां कृते उपयोगी नास्ति यथा विज्ञानस्य कृते। संस्कृत शिक्षणस्य सर्वासां विधानां कृते लाभप्रदो नास्ति । मूल्याङ्कनविधिः अयं 'हरबार्टीय पञ्चपदी' इत्यस्य विकसित रूपम् अस्ति । अस्मिन् प्रति सोपानेन उद्देश्यानां प्राप्तये कक्षानुगुणं क्रियाकलापानां संयोजनं कृत्वा मूल्याङ्कनं क्रियते ।

शिक्षणोद्देश्यानि तानि अपेक्षित व्यवहारगत परिवर्तनानि सन्ति यानि शिक्षणस्य माध्यमेन छात्रेषु आनेयानि भवन्ति। इमानि अपेक्षित परिवर्तनानि व्यवहारस्य त्रिषु पक्षेषु भवन्ति-

1. संज्ञात्मकम् ] बौद्धिक
2. भावात्मकम् ] मानसिक (भावनात्मक)

अस्मिन् विधौ निम्नलिखितानि सोपानानि भवन्ति-

3. क्रियात्मकम् ] शारीरिक

**उद्देश्यम्-** सर्वप्रथमम् उद्देश्यानां निर्धारणं क्रियते। शिक्षणोद्देश्यस्य अन्तर्गताः त्रयो मुख्य बिन्दवः सन्ति-

(1) दिशा

(2) व्यवस्थित परिवर्तनम्

(3) क्रिया।

- **व्यवहाररूपम्-** निर्धारित उद्देश्यानाम् आधारेण छात्राणां पूर्वज्ञाने कियत्परिवर्तनं भविष्यति ? ते कियत्ज्ञानं प्राप्स्यन्ति ? एतस्य उल्लेखः भवति ।
- **पाठ्यबिन्दुः** पाठानां बिन्दूनां निर्धारणं क्रियते यथा भाषाशिक्षणस्य पाठेषु वाचनं, प्रश्नोत्तरं, काठिन्यनिवारणम्, सारकथनं, इत्यादीनि सम्मिलितानि सन्ति ।

- **शिक्षककार्यम्-** विषयवस्तु स्पष्टीकरणाय शिक्षकः काः काः क्रियाः करिष्यति ? केषां केषाम् उपकरणानां प्रयोगं च करिष्यति ? एतेषां बिन्दूनाम् उल्लेखः अस्मिन् क्रियते ।
- **छात्रकार्यम्-** प्रत्येकं पाठाय छात्राणाम् अभिप्रेरणाय, तेषां सक्रियसहभागितायाः कृते ये क्रियाकलापाः निर्धार्यन्ते तेषाम् उल्लेखः अस्मिन् सोपाने क्रियते ।
- **मूल्याङ्कनम्-** प्रतिसोपानं सफलतायाः परीक्षणाय मूल्याङ्कन प्रश्नानां रचना क्रियते। पाठस्यान्तेऽपि मूल्याङ्कप्रश्नाः भवन्ति ।

## गुणा:

- अयं मनोवैज्ञानिक विधिः अस्ति ।

## दोषा:

प्रतिसोपाने मूल्याङ्कनेन छात्रेभ्यः अभिप्रेरणं पुनर्बलनञ्च दीयते। मूल्याङ्कन उन्मुखिशिक्षणेन शिंक्षणे कृत्रिमतायाः समावेशो भवति । • सततमूल्याङ्कनेन छात्राः व्यग्राः भयाक्रान्ताश्च भवन्ति ।

## नवीनतमोपागमाः

यस्मिन् समये विश्वस्य अन्येषु देशेषु जनाः साङ्केतिकभाषायां कार्यं कुर्वन्ति स्म, तदा भारते संस्कृतभाषया ब्रह्मज्ञानस्य प्रसारः क्रियते स्म। प्रकृतिप्रत्ययादिविभागराहित्येन तस्योपदेशं 'प्रतिपदपाठविधिना' क्रियते स्म अर्थात् एकैकशः शब्दाः पठ्यन्ते स्म गौः, अश्वः, पुरुषः, हस्त आदयः, किन्तु अनेन विधिना शिक्षणं समयाधिक्येन भवति स्म। एतत्काठिन्यम् एव दूरीकर्तुं सामन्य विशेष लक्षणवतो वैज्ञानिकविधेः निर्माणं जातम्। साम्प्रतं प्रश्नोऽयम् उत्पद्यते यत् आधुनिकवैज्ञानिक प्रौद्योगिकयुगे वयं संस्कृतशिक्षणं रोचकम्, आकर्षकं, सुग्राह्यञ्च कथं कर्तुं शक्नुमः ? संस्कृतशिक्षणस्य विभिन्नविधीनां प्रयोगकरणे सति अपि छात्राणाम् अभिभावकानाञ्च इयं धारणा यत् संस्कृतभाषा रटनेनैव अधिगम्यते तथा भावी अध्यापकानाम् इयं समस्या ये छात्राः संस्कृतं

વાક્ય

અનુવાદ

કારક વિભક્તિ

વાક્ય સંશોધન..

— શિબ

૨૯ ફરવરી—